तनिष्यन्-न्ती-ती, तानयिष्यन्-न्ती-ती, तितनिषिष्यन्-तितांसिष्यन्-तितंसिष्यन्-न्ती-ती ; —

तन्वानः, तानयमानः, तितनिषमाणः-तितांसमानः-तितंसमानः, तन्तन्यमानः ;

तनिष्यमाणः, तानयिष्यमाणः, तितनिषिष्यमाणः-तितांसिष्यमाणः-तितंसिष्यमाणः, तन्तनिष्यमाणः ;

[1]परीतत्, पुरीतत्-पुरीततौ-पुरीततः ; — —

[2]ततः-ततम्-सन्ततम्-सततम्-तवान्, [3]तनितः, तानितः, तितनिषितः-तितांसितः-तितंसितः, तन्तनितः-तवान् ;

[4]अवतानः-तानः, तानः, तितनिषुः-तितांसुः-तितंसुः, तन्तनः ;

तनितव्यम्, तानयितव्यम्, तितनिषितव्यम्-तितांसितव्यम्-तितंसितव्यम्, तन्तनितव्यम् ;

तननीयम्, ताननीयम्, तितनिषणीयम्-तितांसनीयम्-तितंसनीयम्, तन्तननीयम् ;

तान्यम्, तान्यम्, तितनिष्यम्-तितांस्यम्-तितंस्यम्, तन्तन्यम् ;

ईषत्तनः-दुस्तनः-सुतनः, — — —

---

1. क्विपि, 'गमः क्वौ' (6-4-40) इत्यत्र 'गमादीनामिति वक्तव्यम्' (वा. 6-4-40) इत्युक्तत्वात् गमप्रकाराणां ग्रहणेनास्यापि अनुनासिकलोपे, तुकि, 'नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ' (6-3-116) इति पूर्वपदस्य दीर्घे च रूपम्। पुरि=शरीरे तनोति=विस्तृतो भवति इत्यर्थे, 'हलदन्तात् सप्तम्याः संज्ञायाम्' (6-3-9) इत्यलुकि, 'नहिवृति—' (6-3-116) इति पूर्वपदस्य दीर्घे च रूपम्। **पुरीतत्**=नाडीविशेषः।

2. सनि वैकल्पिकेट्त्वादस्य, 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्णिषेधे, 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इति नलोपे, रूपम्। 'समो वा हितततयोः—' (वा. 6-3-109) इति समो मकारस्य वा लोपः।

3. 'द्वितीया श्रितातीतपतित—' (2-1-24) इत्यत्र पतितेति निपातनात् 'यस्य विभाषा' (7-2-15) इत्यस्यानित्यत्वं कुत्रचित् बोध्यते। तेन '**धावितमिभराजभिया**' इत्यादिषु कुत्रचित् निष्ठायामिड् भवतीति ज्ञेयम्। एवमत्रापि निष्ठायामिटि **तनितम्** इति भवतीति **प्रक्रियासर्वस्वे**।

4. '**तनोते**रुपसङ्ख्यानम्' (वा. 3-1-140) इति कर्तरि णप्रत्ययः। पचाद्यचोऽपवादः। अवतनोतीत्य**वतानः**।